

# TATTVA BODHA

Verse 1 to 38

## PRAYER

वासुदेवेन्द्रयोगीन्द्रं नत्वा ज्ञानप्रदं गुरुम् ।
मुमुक्षूणां हितार्थाय तत्त्वबोधोऽभिधीयते ।।

*Vāsudevendrayogīndram natvā jñānapradam gurum |*
*Mumksūnām hitārthāya tattvabodho 'bhidhīyate ||*

**Having saluted Sri Vasudeva, the King of Yogis, the Guru who is the bestower of Jnana (the knowledge) of the Truth, the 'Tattva Bodha' (the knowledge of the Truth) is expounded for the benefit of the seekers after liberation.**

## VERSE 1

साधनचतुष्टयसंपन्नाधिकारिणां मोक्षसाधनभूतं
तत्त्वविवेकप्रकारं वक्ष्यामः।

*Sādhanacatustaya-sampannādhıkārınām moksasādhanabhūtam*
*tattva-vıvekaprakāram vaksyāmah* |

## VERSE 2

साधनचतुष्टयं किम्? नित्यानित्यवस्तुविवेकः।
इहामुत्रार्थफलभोगविरागः। शमादिषट्कसंपत्तिः।
मुमुक्षत्वं चेति।

*Sādhanacatustayam kım? Nıtyānıtyavastuvıvekah* |
*Ihāmutrārthaphalabogavırāgah* | *Śamādısatkasampattıh* |
*Mumuksutvam cetı* |

## VERSE 3

नित्यानित्यवस्तुविवेकः कः?
नित्यवस्त्वेकं ब्रह्म तद्व्यतिरिक्तं सर्वमनित्यम्।
अयमेव नित्यानित्यवस्तुविवेकः।

*Nıtyānıtyavastuvıvekah kah |*
*Nıtyavastvekam brahma tadvyatırıktam sarvamanıtyam |*
*Ayameva nıtyānıtyavastu-vıvekah |*

## VERSE 4

विरागः कः? इहस्वर्गभोगेषु इच्छाराहित्यम्।

*Vırāgah kah? Ihasvargabhogesu ıcchārāhıtyam |*

## VERSE 5.1

शमादिसाधनसंपत्तिः का?
शमो दम उपरतिस्तितिक्षा श्रद्धा समाधानं च इति।।

*Śamādı-sādhana-sampattıh kā?*
*Śamo dama uparatıstıtıksā śraddhā samādhānam ca ıtı |*

## VERSE 5.2

शमः कः? मनो-निग्रहः।

*Śamah kah? Mano-nıgrahah |*

## VERSE 5.3

दमः कः? चक्षुरादिबाह्येन्द्रियनिग्रहः।

*Damah kah? Caksurādıbāhyendrıyanıgrahah |*

## VERSE 5.4

उपरमः कः? स्वधर्मानुष्ठानमेव।

*Uparamah kah? Svadharmānusthānameva |*

## VERSE 5.5

तितिक्षा का? शीतोष्णसुखदुःखादिसहिष्णुत्वम्।

*Tıtıksā kā? Śıtosnasukhaduhkhādısahısnutvam |*

## VERSE 5.6

श्रद्धा कीदृशी ?

गुरुवेदान्तवाक्यादिषु विश्वासः श्रद्धा ।

*Shraddhā kīdṛśī?*

*Guruvedāntavākyādisu viśvāsah śraddhā |*

## VERSE 6.1

समाधानं किम् ? चित्तैकाग्रता ।

*Samādhānam kim? Cittaikāgratā |*

## VERSE 6.2

मुमुक्षुत्वं किम्?
मोक्षो मे भूयाद् इति इच्छा।

*Murnuksutvam kım?*
*Mokso me bhūyād ıtı ıcchā |*

## VERSE 7

एतत् साधनचतुष्टयम्।
ततस्तत्त्वविवेकस्याधिकारिणो भवन्ति।

*Etat sādhanacatustayam |*
*Tatastattvavıvekasyādhıkārıno bhavantı |*

## VERSE 8

तत्त्वविवेकः कः?
आत्मा सत्यं तदन्यत् सर्व मिथ्येति।

*Tattavıvekaḥ kah?*
*Ātmā satyam tadanyat sarvam mıthyetı |*

## VERSE 9

आत्मा कः?
स्थूलसूक्ष्मकारणशरीराद्व्यतिरिक्तः पञ्चकोशातीतः सन्
अवस्थात्रयसाक्षी सच्चिदानन्दस्वरूपः सन् यस्तिष्ठति स आत्मा।

*Ātmā kah?*
*Sthūla-sūksma-kārana-śarīrād-vyatırıktah pañcakośātītah san*
*avasthātrayasāksī saccıdānanda-svarūpah san yastısthatı sa ātmā |*

# VERSE 10

स्थूलशरीरं किम्?
पञ्चीकृतपञ्चमहाभूतैः कृतं सत्कर्मजन्यं
सुखदुःखादिभोगायतनं शरीरम्
अस्ति जायते वर्धते विपरिणमते अपक्षीयते विनश्यतीति
षड्विकारवदेतत् स्थूलशरीरम्।

*Sthūlaśarīram kım?*
*Pañcīkrtapañcamahābhūtaıh krtam satkarmaȷanyam*
*sukhaduhkādıbhogāyatanam śarīram*
*astı ȷāyate vardhate vıparınamate apaksīyate vınaśyatītı*
*sadvıkāravadetat sthūlaśarīram |*

# VERSE 11.1

सूक्ष्मशरीरम् किम्?
अपञ्चीकृतपञ्चमहाभूतैः कृतम् सत्कर्मजन्यम्
सुखदुःखादिभोगसाधनं पञ्चज्ञानेन्द्रियाणि
पञ्चकर्मेन्द्रियाणि पञ्चप्राणादयः मनश्चैकं
बुद्धिश्चैका एवं सप्तदशकलाभिः सह
यत्तिष्ठति तत्सूक्ष्मशरीरम्।

*Sūksmaśarīram kım?*
*Apañcīkrtapañcamahābhūtaıh krtam satkarmajanyam*
*sukhaduhkhādıbhogasādhanam pañcajñānendrıyānı*
*pañcakarmendrıyānı pañcaprānādayah manaścaıkam*
*buddhıścaıkā evam saptadaśakalābhıh saha*
*yattısthatı tatsūksmaśarīram |*

# VERSE 11.2

श्रोत्रं त्वक् चक्षुः रसना घ्राणम् इति पञ्चज्ञानेन्द्रियाणि।
श्रोत्रस्य दिग्देवता। त्वचो वायुः। चक्षुषः सूर्यः। रसनाया वरुणः।
घ्राणस्य अश्विनौ। इति ज्ञानेन्द्रियदेवताः।
श्रोत्रस्य विषयः शब्दग्रहणम्। त्वचो विषयः स्पर्शग्रहणम्।
चक्षुषो विषयः रूपग्रहणम्। रसनाया विषयः रसग्रहणम्।
घ्राणस्य विषयः गन्धग्रहणम् इति।

*Śrotram tvak caksuh rasanā ghrānam ıtı pañcajñānendrıyānı|*
*Śrotrasya dıgdevatā| Tvaco vāyuh| Caksusah sūryah |*
*Rasanāyā varunah | Ghrānasya aśvınau | Itı jñānendrıyadevatāh |*
*Śrotrasya vısayah śabdagrahanam| Tvaco vısayah sparśa-grahanam |*
*Caksuso vısayah rūpagrahanam | Rasanāyā vısayah rasagrahanam |*
*Ghrānasya vısayah gandhagrahanam ıtı |*

# VERSE 11.3

वाक्पाणिपादपायूपस्थानीति पञ्चकर्मेन्द्रियाणि।
वाचो देवता वह्निः। हस्तयोरिन्द्रः। पादयोर्विष्णुः।
पायोर्मृत्युः। उपस्थस्य प्रजापतिः। इति कर्मेन्द्रियदेवताः।
वाचो विषयः भाषणम्। पाण्योर्विषयः वस्तुग्रहणम्।
पादयोर्विषयः गमनम्। पायोर्विषयः मलत्यागः।
उपस्थस्य विषयः आनन्द इति।

*Vākpānıpādapāyūpasthānītı pañcakarmendrıyānı|*
*Vāco devatā vahnıh| Hastayorındraḥ| Pādayorvısnuh|*
*Pāyormrtyuh| Upasthasya prajāpatıh | Itı karmendrıyadevatāh |*
*Vāco vısayah bhāsanam | Pānyorvısayah vastugrahanam |*
*Pādayorvıṣayah gamanam | Pāyorvisayah malatyāgah |*
*Upasthasya vısayah ānanda ıtı |*

# VERSE 12

कारणशरीरं किम्?
अनिर्वाच्यानाद्यविद्यारूपं शरीरद्वयस्य कारणमात्रं
सत्स्वरूपाज्ञानं निर्विकल्पकरूपं यदस्ति तत्कारणशरीरम्।

*Kārana śarīram kım?*
*Anırvācyānādyavıdyārūpam śarīradvayasya kāranamātram*
*satsvarūpājñānam nırvıkalpakarūpam yadastı tatkāranaśarīram |*

# VERSE 13.1

अवस्थात्रयं किम्?
जाग्रत्स्वप्नसुषुप्त्यवस्थाः।

Avasthātrayam kim?
Jāgratsvapnasusuptyavasthāh |

# VERSE 13.2

जाग्रदवस्था का?
श्रोत्रादिज्ञानेन्द्रियैः शब्दादि – विषयैश्च
ज्ञायते इति या सा जाग्रदवस्था।
स्थूलशरीराभिमानी आत्मा विश्व इत्युच्यते।

*Jāgradavasthā kā?*
*Śrotrādıjñānendrıyaıh śabdādı vısayaıśca*
*jñāyate ıtı yā sā jāgradavasthā |*
*Shtūla-śarīrābhımānī ātmā vıśva ıtyucyate |*

# VERSE 13.3

स्वप्नावस्था केति चेत् जाग्रदवस्थायां
यद् दृष्टं यत् श्रुतं तज्जनित-वासनया निद्रासमये
यः प्रपञ्चः प्रतीयते सा स्वप्नावस्था।
सूक्ष्मशरीराभिमानी आत्मा तैजस इत्युच्यते।

*Svapñavasthā ketı cet ȷāgradavasthāyām*
*yad drstam yat śrutam taȷȷanıta-vāsanayā nīdrāsamaye*
*yah prapañcah pratīyate sā svapnāvasthā |*
*Sūksmaśarīrābhımānı ātmā taıȷasa ıtyucyate |*

# VERSE 13.4

अथ सुषुप्त्यवस्था का? अहं किमपि न जानामि
सुखेन मया निद्राऽनुभूयत इति सुषुप्त्यवस्था।
कारणशरीराभिमानी आत्मा प्राज्ञ इत्युच्यते।

*Atha susuptyavasthā kā | Aham kımapı na ȷānāmı |*
*Sukhena mayā nıdrā 'nubhūyata ıtı susuptyavasthā |*
*Kāranaśarīrābhımānī ātmā prāȷña ıtyucyate |*

# VERSE 14.1

पञ्च-कोशाः के?
अन्नमयः प्राणमयः
मनोमयः विज्ञानमयः आनन्दमयश्चेति।

*Pañca-kośāh ke* |
*Annamayah prānamayah*
*manomayah vıȷñānamayah ānandamayaścetı* |

# VERSE 14.2

अन्नमयः कः?

अन्नरसेनैव भूत्वा अन्नरसेनैव वृद्धिं प्राप्य

अन्नरूपपृथिव्यां यद्विलीयते तदन्नमयः कोशः स्थूलशरीरम्।

*Annamayah kah?*

*Annarasenaıva bhūtva annarasenaıva vrddhım prāpya*

*annarūpaprthıvyām yadvılīyate tadannamayah kośah sthūlaśarīram |*

# VERSE 14.3

प्राणमयः कः?

प्राणाद्याः पञ्चवायवः वागादीन्द्रियपञ्चकं प्राणमयः कोशः।

Prānamayah kah?

Prānādyāh pañcavāyavah vāgādīndrıya- pañcakam prāṇamayah kośah |

# VERSE 14.4

मनोमयः कोशः कः?
मनश्च ज्ञानेन्द्रियपञ्चकं मिलित्वा यो भवति
स मनोमयः कोशः।

*Manomayah kośah kah?*
*Manaśca jñānendriyapañcakam militvā yo bhavati*
*sa manomayah kośah* |

# VERSE 14.5

विज्ञानमयः कः?
बुद्धिज्ञानेन्द्रियपञ्चकं मिलित्वा यो भवति
स विज्ञानमयः कोशः।

*Vijñānamayah kah?*
*Buddhijñānendriyapañcakam militvā yo bhavati*
*sa vijñānamayah kośah* |

# VERSE 14.6

आनन्दमयः कः?
एवमेव कारणशरीरभूताविद्यास्थमलिनसत्त्वं
प्रियादिवृत्तिसहितं सत् आनन्दमयः कोशः।
एतत् कोशपञ्चकम्।

*Ānandamayah kah?*
*Evameva kāranaśarīrabhūtāvidyāstha- malinasattvam*
*priyādivrttisahitam sat ānandamayah kośah*
*Etatkośapañcakam* |

## VERSE 15

मदीयं शरीरं मदीयाः प्राणाः मदीयं मनश्च
मदीया बुद्धिर्मदीयम् अज्ञानमिति स्वेनैव ज्ञायते
तद्यथा मदीयत्वेन ज्ञातं कटककुण्डल-गृहादिकं
स्वस्माद्भिन्नं तथा पञ्चकोशादिकं स्वस्माद्भिन्नं
मदीयत्वेन ज्ञातमात्मा न भवति।

*Madīyam śarīram madīyāh prānāh madīyam manaśca*
*madīyā buddhırmadīyam aȷñānamıtı svenaıva ȷñāyate*
*tadyathā madīyatvena ȷñātam kataka- kundalagrhādıkam*
*svasmādbhınnam tathā pañcakośādıkam svasmādbhınnam*
*madīyatvena ȷñātamātmā na bhavatı |*

## VERSE 16.1

आत्मा तर्हि कः? सच्चिदानन्दस्वरूपः।

*Ātmā tarhi kah? Saccidānandasvarūpah |*

## VERSE 16.2

सत् किम्? कालत्रयेऽपि तिष्ठतीति सत्।

*Sat kim? Kālatraye'pi tisthatīti sat |*

## VERSE 16.3

चित् किम्। ज्ञानस्वरूपः?

*Cıt kım? Jñānasvarūpah |*

## VERSE 16.4

आनन्दः कः? सुखस्वरूपः।

*Āandah kah? Sukhasvarūpah |*

## VERSE 16.5

एवं सच्चिदानन्दस्वरूपं स्वात्मानं विजानीयात्।

*Evam saccidānandasvarūpam svātmānam vijānīyāt* |

## VERSE 17

अथ चतुर्विंशतितत्त्वोत्पत्तिप्रकारं वक्ष्यामः।

*Atha caturvimśatitattvotpattiprakāram vaksyāmah* |

## VERSE 18

ब्रह्माश्रया सत्त्वरजस्तमोगुणात्मिका माया अस्ति।

*Brahmāśrayā sattvarajastamogunātmikā māyā asti |*

## VERSE 19

तत आकाशः संभूतः। आकाशाद् वायुः।
वायोस्तेजः। तेजस आपः। अद्भ्यः पृथिवी।

*Tatah ākāśah sambhūtah | Ākāśād vāyuh |*
*Vayostejah | Tejasa āpah | Adbhyah prthivī |*

# VERSE 20

एतेषां पञ्चतत्त्वानां मध्ये आकाशस्य सात्त्विकांशात्
श्रोत्रेन्द्रियं संभूतम्।
वायोः सात्त्विकांशात् त्वगिन्द्रियं संभूतम्।
अग्नेः सात्त्विकांशात् चक्षुरिन्द्रियं संभूतम्।
जलस्य सात्त्विकांशात् रसनेन्द्रियं संभूतम्।
पृथिव्याः सात्त्विकांशात् घ्राणेन्द्रियं संभूतम्।

*Etesām pañcatattvānām madhye ākāśasya sāttvıkāmśāt*
*śrotrendrıyam sambhūtam* |
*Vāyoh sāttvıkāmśāt tvagındrıyam sambhūtam* |
*Agneh sāttvıkāmśāt caksurındrıyam sambhūtam* |
*Jalasya sāttvıkāmśāt rasanendrıyam sambhūtam* |
*Prthıvyāh sāttvıkāmśat ghrānendrıyam sambhūtam* |

# VERSE 21

एतेषां पञ्चतत्त्वानां समष्टिसात्त्विकांशात्
मनोबुद्ध्यहंकार- चित्तान्तःकरणानि संभूतानि।
संकल्पविकल्पात्मकं मनः। निश्चयात्मिका बुद्धिः।
अहंकर्ता अहंकारः। चिन्तनकर्तृ चित्तम्।
मनसो देवता चन्द्रमाः। बुद्धेः ब्रह्मा।
अहंकारस्य रुद्रः। चित्तस्य वासुदेवः।

*Etesām pañcatattvānām samaṣṭısāttvıkāmśāt*
*manobudhyahamkāracıttāntahkaranānı sambhūtānı* |
*Samkalpavıkalpātmakam manah* | *Nıścayātmıkā buddhıh* |
*Ahamkartā ahamkārah* | *Cıntanakartr cıttam* |
*Manaso devatā candramāh* | *Buddheh brahmā* |
*Ahamkārasya rudrah* | *Cıttasya vaśudevah* |

# VERSE 22 & 23

एतेषां पञ्चतत्त्वानां मध्ये
आकाशस्य राजसांशात् वागिन्द्रियं संभूतम्।
वायोः राजसांशात् पाणीन्द्रियं संभूतम्।
वह्नेः राजसांशात् पादेन्द्रियं संभूतम्।
जलस्य राजसांशात् उपस्थेन्द्रियं संभूतम्।
पृथिव्या राजसांशात् गुदेन्द्रियं संभूतम्।
एतेषां समष्टिराजसांशात् पञ्चप्राणाः संभूताः।

*Etesām pañcatattvānām madhye*
*ākāśasya rājasāmśāt vāgindriyam sambhūtam |*
*Vayoh rājasāmśāt panīndriyam sambhūtam |*
*Vahneh rājasāmśāt padendriyam sambhūtam |*
*Jalasya rājasāmśāt upasthendriyam sambhūtam |*
*Prthivyā rājasāmśāt gudendriyam sambhūtam |*
*Etesām samasti-rājasāmśāt pañcaprānāh sambhūtāh |*

# VERSE 24 & 25

एतेषां पञ्चतत्त्वानां तामसांशात् पञ्चीकृतपञ्चतत्त्वानि भवन्ति। पञ्चीकरणं कथम् इति चेत्। एतषां पञ्चमहाभूतानां तामसांशस्वरूपम् एकमेकं भूतं द्विधा विभज्य एकमेकमर्धं पृथक् तूष्णीं व्यवस्थाप्य अपरमपरमर्धं चतुर्धा विभज्य स्वार्धमन्येषु अर्धेषु स्वभागचतुष्टयसंयोजनम् कार्यम्। तदा पञ्चीकरणं भवति। एतेभ्यः पञ्चीकृतपञ्चमहाभूतेभ्यः स्थूलशरीरं भवति।

*Etesām pañcatattvānām tāmasāṁśāt pañcīkrta-pañcatattvānı bhavantı | Pañcīkaranam katham ıtı cet | Etesām pañcamahābhūtānām tāmaśamśasvarūpam ekamekam bhūtam dvıdhā vıbhajya ekamekamardham prthak tūsnīm vyavasthāpya aparamaparamardham caturdhā vıbhajya svārdhamanyesu ardhesu svabhāgacatustayasamyojanam kāryam | Tadā pañcīkaranam bhavatı | Etebhyah pañcīkrta- pañcamahābhūtebhyah sthūlaśarīram bhavatı |*

# VERSE 26

एवं पिण्डब्रह्माण्डयोरैक्यं संभूतम्।

*Evam pındabrahmāndayoraıkyam sambhūtam |*

# VERSE 27 to 31

स्थूलशरीराभिमानि जीवनामकं ब्रह्मप्रतिबिम्बं भवति।
स एव जीवः प्रकृत्या स्वस्मात् ईश्वरं भिन्नत्वेन जानाति।
अविद्योपाधिः सन् आत्मा जीव इत्युच्यते।
मायोपाधिः सन् ईश्वर इत्युच्यते।
एवम् उपाधिभेदात् जीवेश्वरभेददृष्टिः यावत् पर्यन्तं तिष्ठति
तावत् पर्यन्तं जन्ममरणादिरूपसंसारो न निवर्तते।
तस्मात्कारणात् न जीवेश्वरयोर्भेदबुद्धिः स्वीकार्या।

*Sthūlaśarīrābhimāni jīvanāmakam brahmapratibimbam bhavati |*
*Sa eva jīvah prakrtyā svasmāt īśvaram bhinnatvena jānāti |*
*Avidyopādhih san ātmā jīva ityucyate|*
*Māyopādhih san īśvara ityucyate |*
*Evam upādhibhedāt jīveśvarabhedadrstih yāvat paryantam tisthati*
*tāvatparyantam janma- maranādirūpasamsāro na nivartate |*
*Tasmāt kāranāt na jīveśvarayorbhedabuddhih svīkāryā |*

# VERSE 32

ननु साहंकारस्य किंचिज्ज्ञस्य जीवस्य निरहंकारस्य
सर्वज्ञस्य ईश्वरस्य तत्त्वमसीति महावाक्यात्
कथमभेदबुद्धिः स्यादुभयोः विरुद्धधर्माक्रान्तत्वात्।

*Nanu sāhamkārasya kiñcijjñasya jīvasya nirahamkārasya*
*sarvajñasya īśvarasya tattvamasīti mahāvākyāt*
*kathama- bhedabuddhih syādubhayoh viruddhadharmākrāntatvāt |*

# VERSE 33 & 34

इति चेन्न। स्थूलसूक्ष्मशरीराभिमानी त्वंपदवाच्यार्थः।
उपाधिविनिर्मुक्तं समाधिदशासंपन्नं शुद्धं चैतन्यं त्वंपदलक्ष्यार्थः।
एवं सर्वज्ञत्वादिविशिष्ट ईश्वरः तत्पदवाच्यार्थः।
उपाधिशून्यं शुद्धचैतन्यं तत्पदलक्ष्यार्थः।
एवं च जीवेश्वरयोः चैतन्यरूपेणाऽभेदे बाधकाभावः।

*Iti cenna | Sthūlasūksmaśarīrābhımānī tvam- padavācyārthah |*

*Upādhıvınirmuktam samādhıdaśā- sampannam śuddham caıtanyam tvampadalaksyārthaḥ |*

*Evaṁ sarvajñatvādıvıśısta īśvarah tatpadavācyārthah |*

*Upādhıśūnyam śuddhacaıtanyam tatpadalaksyārthah |*

*Evaṁ ca jīveśvarayoh caıtanyarūpenā 'bhede bādhakābhāvah |*

# VERSE 35

एवं च वेदान्तवाक्यैः सद्गुरूपदेशेन च सर्वेष्वपि भूतेषु
येषां ब्रह्मबुद्धिरुत्पन्ना ते जीवन्मुक्ताः इत्यर्थः।

*Evam ca vedāntvākyaih sadgurūpadeśena ca sarvesvapı bhūtesu*
*yesām brahmbuddhırutpannā te jīvanmuktāh ıtyarthah |*

# VERSE 36.1

ननु जीवन्मुक्तः कः?
यथा देहोऽहं पुरुषोऽहं ब्राह्मणोऽहं शूद्रोऽहमस्मीति
दृढनिश्चयस्तथा नाहं ब्राह्मणः न शूद्रः न पुरुषः
किन्तु असंगः सच्चिदानन्दस्वरूपः प्रकाशरूपः
सर्वान्तर्यामी चिदाकाश-रूपोऽस्मीति
दृढनिश्चयरूपोऽपरोक्षज्ञानवान् जीवन्मुक्तः।

*Nanu jīvanmuktah kah?*
*Yathā deho'ham puruso'ham brāhmano'ham sūdro'hamasmītı*
*drdhaniścayas-tathā nāham brāhmanah na śūdrah na purusah*
*kıntu asamgaḥ saccıdānandasvarūpah prakāśarūpah*
*sarvāntaryāmī cidākāśarūpo'smītı*
*drdhaniścaya- rūpo'paroksajñānavān jīvanmuktah* |

# VERSE 36.2

ब्रह्मैवाहमस्मीत्यपरोक्षज्ञानेन
निखिलकर्मबन्धविनिर्मुक्तः स्यात्।

*Brahmaivāhamasmītyaparokṣajñānena*
*nikhilakarma*bandhavinirmuktah syāt |

## VERSE 37.1

कर्माणि कतिविधानि सन्तीति चेत् आगामिसञ्चित - प्रारब्धभेदेन त्रिविधानि सन्ति।

*Karmāni katıvıdhānı santītı cet āgāmısañcıta-prārabdhabhedena trıvıdhānı santı |*

## VERSE 37.2

ज्ञानोत्पत्त्यनन्तरम् ज्ञानिदेहकृतं पुण्यपापरूपं कर्म यदस्ति तदागामीत्यभिधीयते।

*Jñānotpattyanantaram jñānıdehakrtam punyapāparūpam karma yadastı tadāgāmītyabhıdhīyate |*

# VERSE 37.3

सञ्चितं कर्म किम्?
अनन्तकोटिजन्मनां बीजभूतं सत् यत्कर्मजातं
पूर्वार्जितं तिष्ठति तत् सञ्चितं ज्ञेयम्।

*Sañcıtam karma kım?*
*Anantakotıȷanmanām bīȷa bhūtam sat yatkarmaȷātam*
*pūrvārȷıtam tısthatı tat sañcıtam ȷñeyam* |

# VERSE 37.4

प्रारब्धं कर्म किमिति चेत्।

इदं शरीरमुत्पाद्य इह लोके एव सुखदुःखादिप्रदं यत्कर्म तत्प्रारब्धं भोगेन नष्टं भवति प्रारब्धकर्मणां भोगादेव क्षय इति।

*Prārabdham karma kımıtı cet |*

*Idam śarīramutpādya ıha loke eva sukhaduhkhādıpradam yatkarma tatprārabdham bhogena nastam bhavatı prārabdha-karmanām bhogādeva ksaya ıtı |*

# VERSE 38.1

सञ्चितं कर्म ब्रह्मैवाहमिति निश्चयात्मकज्ञानेन नश्यति।

*Sañcıtam karma brahmaıvāhamıtı nıścayātmakaȷñānena naśyatı*

# VERSE 38.2

आगामि कर्म अपि ज्ञानेन नश्यति किञ्च आगामि-कर्मणां
नलिनीदलगतजलवत् ज्ञानिनां सम्बन्धो नास्ति।

*Āgāmı karma apı ȷñānena naśyatı kıñca āgāmı-karmanām*
*nalınīdalagataȷalavat ȷñānınām sambandho nāstı |*

# VERSE 38.3

किञ्च ये ज्ञानिनं स्तुवन्ति भजन्ति अर्चयन्ति
तान्प्राति ज्ञानिकृतं आगामि पुण्यं गच्छति।
ये ज्ञानिनं निन्दन्ति द्विषन्ति दुःखप्रादानं कुर्वन्ति तान्प्रति
ज्ञानिकृतं सर्वमागामि क्रियमाणं यदवाच्यं कर्म पापात्मकं
तद्गच्छति। सुहृदः पुण्यकृत्यं दुर्हृदः पापकृत्यं गृह्णन्ति।

*Kıñca ye ȷñānınam stuvantı bhaȷantı arcayantı*
*tānpratı ȷñānıkrtam āgāmı punyam gacchati|*
*Ye ȷñānınam nindantı dvısantı duhkhapradānam kurvantı tānpratı*
*ȷñānıkrtam sarvamāgāmı krıyamānam yadavācyam karma pāpātmakam*
*tadgacchatı | Suhrdah punyakrtyam durhrdah pāpakrtyam grhnantı |*

# VERSE 38.4

तथा चात्मवित्संसारं तीर्त्वा ब्रह्मानन्दमिहैव प्राप्नोति।
तरति शोकमात्मवित् इति श्रुतेः।
तनुं त्यजतु वा काश्यां श्वपचस्य गृहेऽथ वा।
ज्ञानसंप्राप्तिसमये मुक्तोऽसौ विगताशयः। इति स्मृतेश्च।

*Tathā cātmavıtsamsāram tīrtvā brahmānanda-*
*mıhaıva prāpnotı* | *Taratı śokamātmavit ıtı śruteh* |
*Tanum tyaȷatu vā kāśyām śvapacasya grhe 'tha vā* |
*Jñānasamprāptısamaye mukto 'sau vigatāśayah* |
*Itı smrteśca* |